# shrI dakShiNAmUrti aShTottarashatanAma stotra

# શ્રીદક્ષિણામૂર્તિ અષ્ટોત્તરશતનામસ્તોત્ર

## Document Information

Text title : dakShiNAmUrti aShTottara shatanAma stotra 1

File name : dakshina108str.itx

Category : aShTottarashatanAma, shiva, stotra

Location : doc_shiva

Transliterated by : Arun Shantharam shantharam.arun at gmail.com

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Description-comments : See corresponding nAmAvalI

Latest update : January 7, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીદક્ષિણામૂર્તિ અષ્ટોત્તરશતનામસ્તોત્ર

॥ અથ ધ્યાનમ્ ॥

વટવૃક્ષ તટાસીનં યોગી ધ્યેયાંઘ્રિ પઙ્કજમ્ ।
શરશ્ચન્દ્ર નિભં પૂજ્યં જટામુકુટ મણ્ડિતમ્ ॥ ૧ ॥

ગઙ્ગાધરં લલાટાક્ષં વ્યાઘ્ર ચર્મામ્બરાવૃતમ્ ।
નાગભૂષં પરંબ્રહ્મ દ્વિજરાજવતંસકમ્ ॥ ૨ ॥

અક્ષમાલા જ્ઞાનમુદ્રા વીણા પુસ્તક શોભિતમ્ ।
શુકાદિ વૃદ્ધ શિષ્યાઢ્યં વેદ વેદાન્તગોચરમ્ ॥ ૩ ॥

યુવાનાં મન્મથારાતિં દક્ષિણામૂર્તિમાશ્રયે ।

॥ અથ દક્ષિણામૂર્તિ અષ્ટોત્તરશતનામ સ્તોત્રમ્ ।
ૐ વિદ્યારૂપી મહાયોગી શુદ્ધજ્ઞાની પિનાકધૃત્ ।
રત્નાલઙ્કૃત સર્વાઙ્ગી રત્નમૌલિર્જટાધરઃ ॥ ૧ ॥

ગઙ્ગાધર્યચલાવાસી મહાજ્ઞાની સમાધિકૃત્ ।
અપ્રમેયો યોગનિધિર્તારકો ભક્તવત્સલઃ ॥ ૨ ॥

બ્રહ્મરૂપી જગદ્વ્યાપી વિષ્ણુમૂર્તિઃ પુરાતનઃ ।
ઉક્ષવાહશ્ચર્મવાસાઃ પીતામ્બર વિભૂષણઃ ॥ ૩ ॥

મોક્ષદાયી મોક્ષનિધિશ્ચાન્ધકારી જગત્પતિઃ ।
વિદ્યાધારી શુક્લતનુઃ વિદ્યાદાયી ગણાધિપઃ ॥ ૪ ॥

પ્રૌઢાપસ્મૃતિ સંહર્તા શશિમૌલિર્મહાસ્વનઃ ।
સામ પ્રિયોઽવ્યયઃ સાધુઃ સર્વ વેદૈરલઙ્કૃતઃ ॥ ૫ ॥

હસ્તે વહ્નિધરઃ શ્રીમાન્ મૃગધારી વશઙ્કરઃ ।
યજ્ઞનાથ ક્રતુધ્વંસી યજ્ઞભોક્તા યમાન્તકઃ ॥ ૬ ॥

ભક્તાનુગ્રહ મૂર્તિશ્ચ ભક્તસેવ્યો વૃષધ્વજઃ ।

ભસ્મોધ્દૂલિત સર્વાઙ્ગઃ ચાક્ષમાલાધરોમહાન્ ॥ ૭॥

ત્રયીમૂર્તિઃ પરમ્બ્રહ્મ નાગરાજૈરલઙ્કૃતઃ ।
શાન્તરૂપો મહાજ્ઞાની સર્વલોકવિભૂષણઃ ॥ ૮॥

અર્ધનારીશ્વરો દેવોમુનિસ્સેવ્યસ્સુરોત્તમઃ ।
વ્યાખ્યાનદેવો ભગવાન્ રવિ ચન્દ્રાગ્નિ લોચનઃ ॥ ૯॥

જગદ્ગુરુર્મહાદેવો મહાનન્દ પરાયણઃ ।
જટાધારી મહાયોગી જ્ઞાનમાલૈરલઙ્કૃતઃ ॥ ૧૦॥

વ્યોમગઙ્ગા જલ સ્થાનઃ વિશુધ્દો યતિરૂર્જિતઃ ।
તત્ત્વમૂર્તિર્મહાયોગી મહાસારસ્વતપ્રદઃ ॥ ૧૧॥

વ્યોમમૂર્તિશ્ચ ભક્તાનાં ઇષ્ટકામ ફલપ્રદઃ ।
પરમૂર્તિઃ ચિત્સ્વરૂપી તેજોમૂર્તિરનામયઃ ॥ ૧૨॥

વેદવેદાઙ્ગ તત્ત્વજ્ઞઃ ચતુઃષ્ષષ્ટિ કલાનિધિઃ ।
ભવરોગ ભયધ્વંસી ભક્તાનામભયપ્રદઃ ॥ ૧૩॥

નીલગ્રીવો લલાટાક્ષો ગજ ચર્માગતિપ્રદઃ ।
અરાગી કામદશ્ચાથ તપસ્વી વિષ્ણુવલ્લભઃ ॥ ૧૪॥

બ્રહ્મચારી ચ સંન્યાસી ગૃહસ્થાશ્રમ કારણઃ ।
દાન્તઃ શમવતાં શ્રેષ્ઠો સત્યરૂપો દયાપરઃ ॥ ૧૫॥

યોગપટ્ટાભિરામશ્ચ વીણાધારી વિચેતનઃ ।
મતિપ્રજ્ઞા સુધાધારી મુદ્રાપુસ્તક ધારણઃ ॥ ૧૬॥

વેતાલાદિ પિશાચૌઘ રાક્ષસૌઘ વિનાશનઃ ।
રાજ યક્ષ્માદિ રોગાણાં વિનિહન્તા સુરેશ્વરઃ ॥

॥ ઇતિ શ્રીદક્ષિણામૂર્ત્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Arun Shantharam shantharam.arun at gmail.com

*shrI dakShiNAmUrti aShTottarashatanAma stotra*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*